National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2026; 1(64): 184-187
© 2026 NJHSR
www.sanskritarticle.com

**अशोका रुइदास**
शोधच्छात्रा,
लखनऊ विश्वविद्यालय,
लखनऊ

**Correspondence:**
**अशोका रुइदास**
शोधच्छात्रा,
लखनऊ विश्वविद्यालय,
लखनऊ

# शाङ्कराचार्य-शैवदर्शनयोः अद्वैतवादस्य विश्लेषणात्मकमध्ययनम्

**अशोका रुइदास**

**शोधसारः** – 'अ' इति निषेधवाचकः, 'द्वैतम्' इति द्विधाभावः, यस्यार्थोऽस्ति द्वैतराहित्यम् अर्थात् एकमेवावशिष्टम्। एतयोर्द्वयोः शब्दयोर्मिलितं स्वरूपमेवावद्वैतवाद इति कथ्यते। समस्तमस्तित्वं केवलमेकयैव परमसत्तया विरचितमस्ति। अस्याशयः सर्ववस्तूनामुत्पत्तिरेकस्मादेव स्रोतोऽभवत् तस्मिन्नेव च विलीना भवति। आचार्यशङ्करानुसारं **"ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः"** इत्यर्थात् ब्रह्मैव परमार्थसत्यं जगच्च मायात्मकं मिथ्याभूतम्। ब्रह्मणोऽतिरिक्ता न काप्यन्या सत्ता विद्यते, यत्किमपि प्रतीयते तत्सर्वं ब्रह्मण एव रूपम्। ब्रह्म अद्वितीयमस्ति निखिलं च जगत् तस्य माया वा अभिव्यक्तिरस्ति, यस्य परमं लक्ष्यमात्मसाक्षात्कारेणैतदैक्यस्य परिज्ञानमस्ति। एवमेव काश्मीरशैवदर्शनमप्यद्वैतवादसिद्धान्तमनुसरति। तन्मतेन शिव एवैकाकिनी परमसत्ता वर्तते। शिवस्तस्य शक्तिश्चैव विश्वब्रह्माण्डस्य स्वरूपत्वेन निरूपितौ स्तः। अस्य प्रस्तुतशोधपत्रस्य मुख्योद्देश्यमिदमस्ति यदाचार्यशङ्करस्याद्वैतवादः काश्मीरशैवदर्शनस्याद्वैतवादश्च कियद्रूपौ स्तः तयोर्मध्ये च कः प्रभूतो भेद इति विश्लेषणम्।

**मुख्यशब्दाः** – ब्रह्मः, माया, जगत्, जीवः, शिवः, शक्तिः, मोक्षः ।

**भूमिका** – आचार्यशङ्करस्य जन्म केरलप्रदेशस्य मालावारप्रान्तस्थे कालटीग्रामे प्रकृष्टविदुषो धर्मनिष्ठस्य श्रीशिवगुरोस्तस्य पत्न्याः श्रीमतीसुभद्रादेव्याश्च गर्भाद्वैशाखशुक्लपञ्चम्यां तिथौ संजातम्। तस्य पितामहस्य नाम विद्याधरो विद्याधिराजो वाऽसीत्। भगवतः शङ्करस्याराधनया तस्य पितरौ सर्वगुणसम्पन्नं पुत्रमलभेताम्। अत एव तस्य नाम शङ्कर इति कृतम्। आचार्यशङ्करेण दशोपनिषत्सु भाष्याणि विरचितानि। अन्यान्यपि सन्ति यथा – ब्रह्मसूत्रभाष्यम्, गीताभाष्यम्, विष्णुसहस्र-नामभाष्यमित्यादीनि। आचार्यशङ्करानुसारं ब्रह्मैव परमसत्यं जगच्च मिथ्या। ब्रह्मणोऽन्या कापि सत्ता नास्ति। यथा निगमः अर्थात् वेदोपनिषदः भारतीयदर्शनस्य मूलस्रोतः स्वीक्रियते तथैवागमः अर्थात् तन्त्रशास्त्रं शैवदर्शनस्य मूलस्रोतः इति मान्यतां लभते। यथा वेदोपनिषद्भ्यो द्वैतद्वैताद्वैत-अद्वैतवेदान्तानां प्रादुर्भावोऽभवत् तथैवागमशास्त्रादपि तिस्रः शैवदार्शनिकिधाराः प्रादुर्भूताः – ताश्च सन्तिः

- भेदवादी शैवसिद्धान्तः (तमिलनाडुप्रदेशस्य)
- भेदाभेदवादी वीरशैवदर्शनम् (कर्नाटकप्रदेशस्य)
- अभेदवादी अद्वैतशैवदर्शनं वा त्र्यम्बकशैवदर्शनम् (काश्मीरदेशीयम्)।

अद्वैतशैवदर्शनानुसारम् अर्थात् काश्मीरशैवदर्शनानुसारं शिव एव परमार्थसत्यम्। सर्वमिदं शिवमयमेव वर्तते।

**ब्रह्म** – अस्मिन् संसारे यत्किमपि वयं पश्यामः चिन्तयामो जानीमो वा तेषु कानिचित्तु क्षणभङ्गुराणि भवन्ति। तेषामस्तित्वं कतिपयक्षणं यावदेव सत्यं तिष्ठति। तदनन्तरं तानि स्वयमेव विनश्यन्ति। तेषां केवलमाभास एव जायते।आचार्यशङ्करानुसारं ब्रह्मैवैकमेव परमार्थसत्यमस्ति यन्निर्विकल्पं निर्गुणं निराकारमनन्तं सर्वव्यापि च वर्तते। निर्गुणमपि सत् तत् सर्वेषां गुणानामाधारभूतं विद्यते यतोहि तदेवैकमेव पूर्णमस्ति। शङ्कराचार्येणाद्वैतवेदान्ते प्रतिपादितं यद् ब्रह्म सगुणं निर्गुणं च भवति।

सगुणं ब्रह्म ईश्वररूपेण प्रकटितं भूत्वा जगतः सृष्टिं करोति निर्गुणं च ब्रह्मणो वास्तविकं स्वरूपमस्ति। उभे अपि एकमेव किन्तु दृष्टिकोणभेदाद् द्विरूपेण गृह्येते। यथा संसारस्य पदार्था असत्याः कल्पिताश्च सन्ति तथैव जीवोऽप्यविद्यामाश्रित्य तिष्ठति। ब्रह्मैवैकमात्रा सत्तास्तीत्यस्य ज्ञानस्याभावादेव जीवस्य सत्ता वर्तते। जीव ईश्वरस्य कल्पनामुपासनार्थं करोति।ईश्वरो जगतः स्वामी नियन्ता च वर्तते। अत एव जीवस्तस्योपासनां करोति तं च दयादाक्षिण्यागाधकरुणादिगुणैर्मण्डितं मन्यते। एतदेव सगुणं ब्रह्म ईश्वरो वा। पारमार्थिकदृष्ट्या ब्रह्म निर्गुणमस्ति।तस्योपरि जीवस्य जगतो वा कोऽपि गुण आरोपेतुं न शक्यते।आचार्यशङ्करस्य मते तदेतद् ब्रह्म सजातीयविजातीयस्वगतभेदेभ्यो रहितं भवति। तेन पुनरुक्तं यद् ब्रह्मणो द्वे रूपे भवतः – विश्वं विश्वातीतं च। विश्वरूपे तत् गुणसम्पन्नं मन्तुं शक्यते किन्तु विश्वातीतरूपे तदनिर्वचनीयमस्ति यतस्तत्र कस्यापि गुणस्य सत्ता न स्वीक्रियते।अत एव तत् निर्गुणमस्ति।

आचार्यशङ्करेण ब्रह्मणः स्वरूपनिर्णयार्थं द्विविधं लक्षणं स्वीकृतमस्ति – स्वरूपलक्षणं तटस्थलक्षणं च। **"जन्माद्यस्य यतः"**[1] इत्यस्यार्थो वर्तते यद् ब्रह्म जगत उत्पत्तिस्थितिलयानां कारणमस्ति। आगन्तुकगुणानां समावेशकारणादेतत्तस्य तटस्थलक्षणं विद्यते। **"सत्यं ज्ञानमनन्तं ब्रह्म"**[2] तथा **"विज्ञानमानन्दं ब्रह्म"**[3] इति ब्रह्मणः स्वरूपप्रतिपादकलक्षणानि सन्ति। ब्रह्म अस्य जगत उपादानकारणं निमित्तकारणं चोभयमस्ति।

**जगत्** – आचार्यशङ्करेणोक्तं यत् **"ब्रह्म सत्यं जगन्मिथ्या"** इति। अत्रैषा जिज्ञासा समुत्पद्यते यन्निर्गुणब्रह्मणः स्वीकरणे तेन सृष्टिः सम्भवितुं नार्हति। यदि सगुणं ब्रह्म वर्तते तर्हि तदेव सृष्टिं करिष्यति। यथा शङ्करेणोक्तं यद् ब्रह्म सत्यमस्ति जगच्च मिथ्या तथा च ब्रह्मजीवयोः कोऽपि भेदो नास्ति। अत्र ब्रह्मणा सह जगतः चर्चां कृत्वा तयोर्भेदः क्रियते। स्पष्टमिदं यदुभयोः सत्ता भिन्ना वर्तते। सत्ता त्रिविधा भवति – प्रातिभासकी व्यवहारिकी पारमार्थिकी च। अत्र सुस्पष्टं यज्जगतः पारमार्थिकी सत्ता नास्ति।पारमार्थिकी सत्ता सा भवति या शुद्धा त्रिकालबाधरहिता च स्यात्। त्रिकालबाधेनाभि-प्रायोऽयमस्ति यद्वर्तमानभूतभविष्यत्सु त्रिषु कालेषु तथा स्वप्नजाग्रत्सुषुप्तिषु तिसृष्ववस्थासु सा सत्ता एकरूपेणैव तिष्ठेत्। व्यवहारिकी सत्ता सा स्थितिर्यस्यां वस्तूनि विद्यमानानि भवन्ति। वयं तानि सत्यानि मन्यामहे। तानि स्वप्नवदसत्यं न सन्ति नापि च त्रिकालसत्यानि। इत्थं जगत् न पूर्णतः सत् अस्ति नापि च पूर्णतः असत् अर्थात् न चोभयम् यतोहि उभयोः स्वीकरणे विचारे विरोधाभासो भविष्यति। अत एव शङ्कराचार्येण जगत् अनिर्वचनीयमित्युक्तम्। अनिर्वचनीयं तदेव यस्य सत्यत्वस्वीकरणमपि दोषपूर्णमस्ति असत्यत्वस्वीकरणमपि च त्रुटिपूर्णम् यतोहि यस्याधारः सत्यमस्ति तस्याधारः कथमसत्यो भवितुमर्हति। शङ्कराचार्येण संसारः पारमार्थिकसत्यत्वेन नाङ्गीकृतः यतोहि संसारस्योत्पत्तिर्ल-यश्च भवति।अयन्तु परिवर्तनशीलो वर्तते।

**माया** – शङ्कराचार्येण विश्वं ब्रह्मणः प्रपञ्च इति कथितम्।एषा मायायाः प्रतीतिरिति निर्दिष्टा।माया ब्रह्मण इव सतीति वक्तुं न शक्यते। तेन माया अविद्या च एकमेव मन्येते परं परवर्तिनो वेदान्तिन एतयोर्भेदं स्वीकुर्वन्ति। शङ्कराचार्यमतानुसारं मायाया अविद्याया वा काश्चन मूलविशेषताः सन्ति:

- १.एषा न सती अस्ति न च स्वतन्त्रा अपितु जडभौतकी वर्तते
- २.एषा ब्रह्मण एव शक्तिरस्ति ब्रह्मणि च निवसिति किन्तु अस्या ब्रह्मणा सह कोऽपि सम्बन्धो नास्ति। एतत्तस्य केवलं तादात्म्यमेव वक्तुं शक्यते।
- ३. ब्रह्मणा सह नित्यसम्बद्धत्वादेषाप्यनादिः।
- ४. एषा अनिर्वचनीया वर्तते।

मायास्वरूपसम्बन्धे शङ्कराचार्येणोक्तं यत् परमेश्वरस्य बीजशक्तिरेव मायेति। अनयैव शक्त्या परमेश्वरः सक्रियः सन् सृष्टिं करोति। मायाया एवाधारेण संसारस्य नानारूपत्वं ज्ञायते।एषा नानारूपात्मकं जगदुत्पादयति। सत्त्वरजस्तम इति त्रिभिर्गुणैर्विनिर्मितत्वादेषा त्रिगुणात्मिका वर्तते। आचार्येण माया जडा भौतकी अचेतना चेति कथिता। तेन माया अविद्या अज्ञानम् अध्यासः अनिर्वचनीयः विवर्तः भ्रान्तिः भ्रमः नामरूपम् अव्यक्तम् अक्षरं बीजशक्तिः मूलप्रकृतिरित्यादिशब्दानां प्रयोग एकस्मिन्नेवार्थे कृतः। किन्तु विशेषरूपेण माया अविद्या अध्यासः विवर्तश्चेत्येते एकार्था एव मताः।

**ईश्वरः** - ईश्वरो जगति श्रेष्ठो वर्तते यतोहि जगत् आगमापायित्वादभावरूपमस्ति परन्त्वीश्वरो भावरूपो विद्यते।स नित्यस्थायी सन् आवागमनबन्धनात् पृथगस्ति। ईश्वरः संसारस्योत्पत्तिकारणं भूत्वापि स्वयमकारणो वर्तते। संसारस्योत्पत्तौ तस्य स्वभाव एव कारणं भवति परन्त्वीश्वरस्य पश्चान्न किमपि कारणमस्ति। अत एव ईश्वरोऽस्मिन् संसारे व्यवस्थायाः सामञ्जस्यस्य च संस्थापनकारणमस्ति येन सांसारिकक्रिया एकस्मिन् निर्णीते क्रमे प्रचलति। शङ्कराचार्येणेश्वरस्य सत्तायाः प्रमाणत्वेन श्रुतिमतिरिक्त्य नान्यः कश्चिदाधारः स्वीकृतः। ईश्वरः स्वयंपूर्णः सन् अप्युपासनाया विषयो भवति यतस्तस्यैकत्वं वर्तते।स एव कर्मणि प्रेरयति कर्मफलं च ददाति। शुभाशुभकर्माणि तस्यैव प्रेरणया भवन्ति तत्फलभोगाय च स एव बाध्यं करोति।परन्त्वीश्वर एतस्मात् परत्वात् नैतिकः एकः धर्माधर्मरहितश्चास्ति। अत एवेश्वरः स्रष्टास्ति यतोहि सृष्टिस्तस्य स्वभावो वर्तते एषा च तस्य लीलेव।तन्निष्क्रियं ब्रह्म मायया आवृतं सत् सक्रियं भूत्वा एतां लीलां करोति। परं स्वयमेव संसारे व्याप्तो भूत्वाप्यस्य दोषेभ्यः पृथक् स्थितत्वात् स विश्वातीतोऽस्ति। अत्र निवासिनां जीवानां कर्मभिस्तस्य कोऽपि प्रत्यक्षसम्बन्धो न भवति अपितु स विविक्तः सन् तत्फलं ददाति।

अत एव शङ्कराचार्येण ईश्वरो ब्रह्मणो विवर्तः इति स्वीकृतः। पुनश्च मायावृत्तं ब्रह्म एवेश्वर इति कथितं किन्तु तेन ब्रह्मेश्वरयोर्भेदोऽपि स्थापितः। ब्रह्म निर्गुणं निराकारं निर्विशेषं च मत्वा ईश्वरः सगुणः साकारः सविशेषश्च स्वीकृतः। अस्मादेव कारणादीश्वरो ब्रह्मणः पृथक् सन् जगतः स्रष्टा पालकः संहारकश्च वर्तते।एतदेवोपासनाया विषयो वर्तते न तु ब्रह्म। ईश्वरो विग्रहवान्

(स्वरूपवान्) विद्यते परं न तु ब्रह्म। ब्रह्म शाश्वतं सत्यमस्ति किन्तु ईश्वरो मायारहितजीवस्य कृते सत्यो भवति। मायारहितो जीवो ब्रह्मणः साक्षात्कारं करोति। ईश्वरो ब्रह्मणो रूपान्तरणमस्ति।

**जीवः –** आत्मैव जीवः। जीवे कश्चन भौतिकोंऽशः प्राणतत्त्वं च तिष्ठति यद्धि व्यक्तेश्चैतन्यक्रियाणां नियमनं करोति। ब्रह्मणि आत्मनि वा जीवे एकमेव अन्तरमस्ति यद् ब्रह्म पूर्णमस्ति आत्मा वा चेतनस्तस्यांशः। ब्रह्म यदा मायामोहितं भवति तदेवेश्वरो भवति यदा चाविद्यापोहितं भवति तदा आत्मा भवति स एव च जीव इत्युच्यते। आत्मा जीवश्चोभयौ चैतन्यस्वरूपौ स्तः यद्यपि चैतन्यमात्मनो गुणो न भूत्वा शङ्कराचार्येण तस्य स्वभाव एवाङ्गीकृतः। अत एवान्तःकरणावच्छिन्नचैतन्यं जीव इति कथ्यते। अयमेव शुभाशुभकर्मणां फलमुपभुङ्क्ते। आत्मा सर्वासु अवस्थासु विद्यमानस्तिष्ठति। अयन्तु न भोक्ता भवति न च कर्ता। अत एवायं पापपुण्याभ्यां पृथग् भवति। जीवस्य स्वरूपं शान्तं भवति किन्तु चञ्चलबुद्धेः कारणाज्जीवश्चञ्चलो वर्तते। आत्मनः सत्ता पारमार्थिकी भवति परं जीवस्य सत्ता व्यावहारिकीविद्यते। यदा स्वतन्त्रात्मा कस्यचिन्मनोबुद्धिशरीरेन्द्रियादिषु बध्यते सैव जीव इत्यभिधीयते। जीवा अनेके सन्ति। अत्रात्मा अविद्यायां प्रतिबिम्बितो भूत्वा जीव इति कथ्यते। तदानीं जीवस्य क्रियाः परस्परं भिन्ना भवन्ति यद्यप्ययमात्मन आभासमात्र एव। संसारे बन्धनमेव जीवस्य धर्मोऽस्ति।

**बन्धनं मोक्षश्च –** अविद्यावृतं सांसारिकजीवनमेव बन्धनमस्ति। बन्धनस्यार्थ एवास्ति एकस्मिन् मण्डले आबद्धता। कर्मैव बन्धनमित्युच्यते। जीवोऽस्यैव कर्मचक्रस्य परिधौ भ्रमति। एतदेव पुनर्जन्मन आधारो विद्यते। कर्मणस्त्रयो भेदाः प्रोक्ताः:

- **सञ्चितकर्म –** पूर्वजन्मसु कृतकर्मणां फलमस्मिन् जन्मनि अपि विद्यमानं भवति।
- **प्रारब्धकर्म –** पूर्वजन्मनां शुभाशुभफलानां भोगः प्रागेव संजातः शिष्टं च अस्मिन् जन्मनि भुङ्क्ते।
- **सञ्चीयमानकर्म –** तानि कर्मफलानि यानि अस्मिन् जन्मनि कर्मभिः सञ्चीयन्ते।

कर्मफलं तु अवश्यमेव भोक्तव्यं भवति। एतद्विना मनुष्यो मुक्तो भवितुं नार्हति। अज्ञानस्य अविद्याया वा वशीभूतो जीवो विवेकहीतः सत्ज्ञानरहितो विषयासक्तश्च भूत्वा क्षणिकसुखमेव परमसुखं मन्यते। अस्यैव कुफलस्य पाशे बद्धः स आवागमनचक्रे भ्रमति। अस्मात् मुक्तता परमानन्दप्राप्तये अनिवार्यास्ति। एषा मुक्तिरेव मोक्ष इत्युच्यते। ब्रह्मैव परमानन्दोऽस्ति तस्य प्राप्तिरेव मोक्षः। अत एव शङ्कराचार्येणोक्तं यत् - **"ब्रह्मविद् ब्रह्मैव भवति"**। एतच्च मिथ्याज्ञानस्य निवृत्त्या संभवति। **"मिथ्याज्ञाननिवृत्तिमात्रं मोक्षः"**। शङ्कराचार्यस्य मते मोक्षस्याभिप्रायोऽस्ति आत्मनः स्वरूपे अवस्थितिः। **"स्वात्मन्यवस्थानं मोक्षः"**। अस्मात् पूर्व स्वतन्त्रात्मा शरीरेण सह सम्बन्धं प्रस्थापितत्वात् शरीरस्य सुखदुःखे स्वकीयं मन्यते। शङ्कराचार्येण कर्म न तु ज्ञानं मोक्षस्य साधनमङ्गीकृतम्। कर्म शुभं वा अशुभं भवतु उभयमपि बन्धकमेव भवति। परं ज्ञानं बन्धनं छिनत्ति।

अद्वैतवेदान्ते यथा जगन्मिथ्या ब्रह्म च सत्यं प्रोक्तं तथैव काश्मीरशैवाद्वैतदर्शने शिव एव सत्यो वर्तते। शिवशक्ती उभौ जगतः सृष्टिं कुरुतः। काश्मीरशैवदर्शने शिवशक्ती एकरूपे एव स्वीक्रियते तयोर्मध्ये कोऽपि भेदो नास्ति। काश्मीरशैवाद्वैतदर्शने ब्रह्म आत्मा च एकमेव तत्त्वमस्ति।

**शिवस्वरूपम्–**विश्वकारणस्य परमशिवस्यैवैकमात्रसत्ता काश्मीरशैव-दर्शने वर्तते। स प्रमाता प्रमेयश्च अथवा ज्ञाता ज्ञेयश्चोभयमस्ति। शिवोऽनुभवकर्तास्ति स्वयमनुभूतपदार्थश्च यतोह्यनुभवकर्ता जगच्चोभ-यमेव सः। स्वस्वरूपे निहिताद्भुतशक्त्या स एव स्वात्मानं ब्रह्माण्डरूपेण प्रकटयति विभिन्नदशासु च वर्तमानापि स्वकीयाद्य-थार्थस्वरूपात् न च्युतो भवति।

शिवोऽनिर्वचनीया सत्तास्ति यतो निर्गुणत्वात्तस्य निर्वाचनं न सम्भवति। शिवस्त्रिगुणेभ्यः (सत्त्वरजस्तमोभ्यः) परः निर्गुणो निराकारश्चास्ति। काश्मीरशैवदार्शनिकाः शिवम् अज्ञेयम् अनिर्वचनीयं च मन्यन्ते किन्तु शिवत्वप्राप्तौ शिवस्य ज्ञानं सम्भवति आगमस्य चोपयोगो विद्यते। शिवश्चित्स्वरूपो विद्यते।शिवस्य न कोऽपि रूपाकारः सम्भवति यतोहि जडपदार्थानामेव रूपाकाराः भवन्ति न तु चेतनायाः।

काश्मीरशैवदर्शने परतत्त्वं परिपूर्णं सर्वसम्पन्नं च सत्ता अस्ति या सर्वमस्ति सर्वसीमितवस्तुभ्यः परा समग्रसत्ता च।शिव आत्मरूपो भूत्वापि परमसत्ता अस्ति यतोहि स निराकाङ्क्षः सर्वबद्धताभ्यश्च स्वतन्त्रसत्ता वर्तते। शिवः सच्चिदानन्दस्वरूपोऽस्ति। स सदिति कथ्यते यतो हि सत्यरूपः, चितिति च कथ्यतेयतो हि स चेतनः।

**शक्तिः –** शक्तितत्त्वं हि शिवस्यैव शक्तिर्वर्तते। एषा परमशिवस्याभा-सरूपतायां द्वितीयं तत्त्वमस्ति यद्धि शिवस्याभिन्नस्वरूपं विद्यते। प्रकाशात्मनः शिवस्य विमर्शस्वरूपमेव शक्तितत्त्वं कथ्यते। शक्तितत्त्वं शिवेन सह सदैव अभिव्यक्तं भवति। यदा परमशिवस्य हृदये सृष्टीच्छा उत्पद्यते तदा शिवशक्तितत्त्वे अभिव्यक्ते भवतः। शिवशक्ती अभिन्नौ स्तः। तयोर्भेदस्तु केवलं व्यवहारिकस्तरे विद्यते। काश्मीरशैवदर्शने कुत्रचित् शिवतत्त्वं परमशिवस्य प्रथमस्पन्दः प्रोक्तः कुत्रचिच्च शक्तितत्त्वमपि परमशिवस्य प्रथमस्पन्द इति कथितमस्ति।

**आत्मा –** अद्वैतवेदान्ते मन्यते यत् प्रत्येकं जनः स्वकीयास्तित्व-स्यात्मनो वा चेतनां विन्दति। काश्मीरशैवदर्शने आत्मैव स्वात्मानं स्वातन्त्र्यशक्त्या विविधेपु रूपेषु अभिव्यनक्ति। काश्मीरशैवदर्शन-दृष्ट्या अन्यान्यपि दर्शनानि आत्मनो वास्तविकस्वरूपस्य परिचयं न कारयन्ति यतोहि तानि आत्मना अभिव्यक्तेषु कतिपयरूपेषु कञ्चन एकमेव तस्य वास्तविकस्वरूपं मन्वते। आत्मनात्मनोः कोऽपि पारमार्थिको भेदो काश्मीरशैवदर्शने नाङ्गीक्रियते। आत्मनः पृथक् अनात्मशब्दाभिधेया न काप्यपि वस्तु विद्यते। आत्मनः पृथक् अनात्मनोऽवधारणा अज्ञानेन वाऽपूर्णज्ञानेन जायते।

अद्वैतवेदान्तकाश्मीरशैवदर्शनयोरात्मसम्बन्धिबिचारे मौलिकप्रभे-दोऽयमेव यदात्मनो वास्तविकस्वरूपनिरूपणप्रयासे अद्वैतवेदान्तः

अनात्मनः सामान्यतश्च आत्मनः पृथक् मतानां वस्तूनां सर्वथा निषेधं करोति, अथवा ताः पारमार्थिकदृष्ट्या मिथ्यात्वेन जानाति, किन्तु काश्मीरशैवदर्शने अनात्मवस्तूनि पारमार्थिकदृष्ट्या आत्मरूपाण्येव स्वीक्रियन्ते। आत्मनो वास्तविकस्वरूपे आत्मचेतनाया अस्तित्वम-द्वैतवेदान्तिनो नाङ्गीकुर्वन्ति, किन्तु काश्मीरशैवदर्शनसारमात्म-चेतना आत्मनो वास्तविकमेव स्वरूपमस्ति। काश्मीर-दर्शनमतेन आत्मा स्वकीये वास्तविकस्वरूपे सच्चिदानन्दशिव एव वर्तते।

**मोक्षः –** अपूर्णज्ञानम् आत्मनो वास्तविकस्वरूपानभिज्ञता वा बन्धनमस्ति तथा च पूर्णज्ञानम् आत्मनो वास्तविकस्वरूपस्य परिज्ञानमेव मोक्ष इति कथ्यते। आत्मा स्वकीयवास्तविकस्वरूपे सच्चिदानन्दरूपः असीमः सर्वज्ञः सर्वशक्तिमान् च वर्तते किन्तु बन्धनकारणात् अपूर्णज्ञानकारणाद्वा स स्वकीयवास्तविकस्वरूपस्य विस्मृतिं प्राप्नोति। फलतः स स्वात्मानं ससीमं मन्तुं प्रारभते। पुनः स्वकीयवास्तविकस्वरूपे अवस्थितिः स्वकीयवास्तविकपूर्णशक्तीनां परिज्ञानमेव वा काश्मीरशैवदर्शने मोक्ष इति प्रोक्तम्।

काश्मीरद्वैतदर्शने मोक्षः पूर्णताया स्थितिर्वर्तते। मोक्षे आत्मा पूर्णानन्दस्वरूपः स्वयं शिव एव भवति। अस्यां स्थितौ भेदज्ञानं द्वैतज्ञानं वा अभेदज्ञाने अद्वैतज्ञाने वा परिणतं भवति। 'इदम्' 'तत्' इति च भेदज्ञानं 'सर्वमहमस्मि' इति भावे परिवर्तते। आत्मा इदं परिजानाति यत् निखिलं विश्वं तस्यैव विभवो वर्तते।

अस्यां स्थितौ आत्मा (जीवन्मुक्तिदशायाम्) यत् किमपि कर्म करोति सा तस्य स्पन्दक्रिया भवति। एवं काश्मीरशैवदर्शने जीवन्मुक्तिदशायामपि कर्म (स्पन्दक्रिया) सम्भवति। अद्वैतवेदान्तिनः मोक्षावस्थायाम् आत्मनः पृथक् ज्ञायमानानां वस्तूनां निषेधं कुर्वन्ति। आत्मनो भिन्नं जगदादिकं मिथ्येति स्वीक्रियते। काश्मीरशैव-दार्शनिकाः मुक्त्यवस्थायाम् आत्मनो भिन्नानां वस्तूनां निषेधं न कुर्वन्ति अपितु ताः आत्मरूपा एवेति मन्वते।

काश्मीरशैवदार्शनिकाः मोक्षं पूर्णताया स्थितिं स्वीकर्तुं विशेषमाग्रहं कुर्वन्ति। तेषामनुसारं मोक्षः केवलं मलानां विनाशदशा नास्ति नापि च प्रकृत्यादिभ्यो निवृत्ताया आत्मनः केवलकैवल्यावस्था मोक्षो वर्तते। मोक्षस्तु शक्तीनां पूर्णप्रकाशनस्य स्थितिरस्ति। बद्धावस्थायाम् आत्मनः शक्तयः सीमिता भवन्ति। मुक्तावस्था शिवावस्था वर्तते या 'अहम्' इति स्थितिः। शिवावस्थायाम् आत्मा स्वयं शिव एव जायते।

**निष्कर्षः –** प्रस्तुतशोधपत्रस्य निष्कर्षोऽयमस्ति यदादिशंकराचार्यो ब्रह्मजीवयोरेकत्वं स्वीकरोति। तन्मतानुसारं सर्वेषु जीवेषु ब्रह्म निवसति। यदा जीवः परमात्मनोऽनुभवं करोति तदा स तद्रूपो जायते। तयोर्मध्यस्थो द्वैतभावो विनश्यति। तदानीमेव स "अहं ब्रह्मास्मि" इति वदति। अपरतः काश्मीरशैवाद्वैतदर्शनमतेन जीवः शिवाद् भिन्नो नास्ति शिव एव जीवो जायते। सर्वेषु जीवेषु शिवो विद्यमानो वर्तते। संसारे सर्वमिदं शिवमयमवे विद्यते।

**सन्दर्भसूची**


१.गोयन्दका,हरिकृष्णदासः,व्याख्याकारः।**वेदान्तदर्शनम् (ब्रह्मसूत्रम्): सरलहिन्दीव्याख्यासहितम्**। गीताप्रेस, गोरखपुरम्।

२.द्विवेदी, श्यामाकान्तः 'आनन्दः', ग्रन्थकारः। **काश्मीरीयशैवदर्शनम् एवं स्पन्दशास्त्रम् ( शिवसूत्र-स्पन्दसूत्र-शक्तिसूत्र-समन्वितम्)**। चौखम्बा सुरभारती प्रकाशनम्, वाराणसी।

३.उत्पलदेवाचार्यः। **शिवदृष्टिः (श्रीमदुत्पलदेवाचार्यविरचितवृत्त्या तथा डॉ. राधेश्यामचतुर्वेदीमहोदयस्य चिन्मयी' हिन्दीव्याख्यया सहिता)**। वाराणसेय संस्कृत संस्थानम्, वाराणसी।

४.सहाय, शिवस्वरूपः, ग्रन्थकारः। **प्राचीनभारतीयधर्मः एवं दर्शनम्**। मोतीलाल बनारसीदास प्रकाशकः।

५.**तैत्तरीयोपनिषद्**। (मूलग्रन्थः)।

६.मिश्र, कैलाशपतिः, ग्रन्थकारः। **काश्मीरशैवदर्शनम् : मूलसिद्धान्तः**। अर्द्धनारीश्वरप्रकाशनम्।

७.अभिनवगुप्तपादः। **तन्त्रालोकः**। (मूलग्रन्थः)।

८.**ई-ज्ञानकोष (eGyanKosh)**।https://egyankosh.ac.in.

९.**विकिपीडिया (Wikipedia)**।https://hi.wikipedia.org.

१०.**गूगल (Google)**।https://www.google.com.


**पाद टिप्पणी**

1. ब्रह्मसूत्रम् 1/1/2
2. तैत्तरीयोपनिषद् 2/1/1
3. तैत्तरीयोपनिषद् 3/5/1, 3/6/1